# shrI mahAshAstranugraha kavachastotraM

# શ્રીમહાશાસ્ત્રનુગ્રહકવચમ્સ્તોત્રમ્

## Document Information

Text title : shAstranugrahakavacam

File name : shaastranugrahakavacam.itx

Category : kavacha, deities_misc

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : April 23, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

shrI mahAshAstranugraha kavachastotraM

# શ્રીમહાશાસ્ત્રનુગ્રહકવચમ્સ્તોત્રમ્

શ્રીદેવ્યુવાચ-
ભગવન્ દેવદેવેશ સર્વજ્ઞ ત્રિપુરાન્તક
પ્રાપ્તે કલિયુગે ઘોરે મહાભૂતૈઃ સમાવૃતે ॥ ૧
મહાવ્યાધિમહાવ્યાળઘોરરાજૈઃ સમાવૃતે
દુઃસ્વપ્નશોકસન્તાપૈઃ દુર્વિનીતૈઃ સમાવૃતે ॥ ૨
સ્વધર્મવિરતે માર્ગે પ્રવૃત્તે હૃદિ સર્વદા
તેષાં સિદ્ધિઞ્ચ મુક્તિઞ્ચત્વં મે બ્રૂહિવૃષધ્વજ ॥ ૩
ઈશ્વર ઉવાચ-
શ‍ૃણુ દેવિ મહાભાગે સર્વકલ્યાણકારણે ।
મહાશાસ્તુશ્ચ દેવેશિ કવચં પુણ્યવર્ધનમ્ ॥ ૪
અગ્નિસ્તમ્ભ જલસ્તંભ સેનાસ્તંભ વિધાયકમ્ ।
મહાભૂતપ્રશમનં મહાવ્યાધિ નિવારણમ્ ॥ ૫
મહાજ્ઞાનપ્રદં પુણ્યં વિશેષાત્ કલિતાપહમ્ ।
સર્વરક્ષોત્તમં આયુરારોગ્યવર્ધનમ્ ॥ ૬
કિમતો બહુનોક્તેન યં યં કામયતે દ્વિજઃ ।
તંતમાપ્નોત્યસન્દેહો મહાશાસ્તુઃ પ્રસાદનાત્ ॥ ૭
કવચસ્ય ઋષિર્બ્રહ્મા ગાયત્રીઃછન્દ ઉચ્યતે ।
દેવતા શ્રીમહાશાસ્તા દેવો હરિહરાત્મજઃ ॥ ૮
ષડઙ્ગમાચરેદ્ભક્ત્યા માત્રયા જાતિયુક્તયા ।
ધ્યાનમસ્ય પ્રવક્ષ્યામિ શ‍ૃણુષ્વાવહિતા પ્રિયે ॥ ૯
અસ્ય શ્રી મહાશાસ્તુઃ કવચમન્ત્રસ્ય । બ્રહ્મા ઋષિઃ ।
ગાયત્રીઃ છન્દઃ । મહાશાસ્તા દેવતા । હ્રાં બીજમ્ ।
હ્રીં શક્તિઃ । હ્રૂં કીલકમ્ ।
શ્રી મહાશાસ્તુઃ પ્રસાદ સિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

હ્રાં ઇત્યાદિ ષડઙ્ગન્યાસઃ ॥

ધ્યાનમ્ ॥

તેજોમણ્ડલ મધ્યગં ત્રિનયનં દિવ્યામ્બરાલઙ્કૃતં
દેવં પુષ્પશરેષુ કાર્મુકલસન્માણિક્યપાત્રાભયમ્ ।
બિભ્રાણં કરપઙ્કજૈઃ મદગજ સ્કન્ધાધિરૂઢં વિભું
શાસ્તારં શરણં વ્રજામિ સતતં ત્રૈલોક્ય સંમોહનમ્ ॥

લં ઇત્યાદિ પઞ્ચોપચાર પૂજા ॥

મહાશાસ્તા શિરઃ પાતુ ફાલં હરિહરાત્મજઃ ।
કામરૂપી દૃશં પાતુ સર્વજ્ઞો મે શ્રુતી સદા ॥ ૧
ઘ્રાણં પાતુ કૃપાધ્યક્ષો મુખં ગૌરીપ્રિયઃ સદા ।
વેદાધ્યાયી ચ મે જિહ્વાં પાતુ મે ચિબુકં ગુરુઃ ॥ ૨
કણ્ઠં પાતુ વિશુદ્ધાત્મા સ્કન્ધૌ પાતુ સુરાર્ચિતઃ ।
બાહુ પાતુ વિરૂપાક્ષઃ કરૌ તુ કમલાપ્રિયઃ ॥ ૩
ભૂતાધિપો મે હૃદયં મધ્યં પાતુ મહાબલઃ ।
નાભિં પાતુ મહાવીરઃ કમલાક્ષોઽવતાત્ કટીમ્ ॥ ૪
સનીપં પાતુ વિશ્વેશો ગુહ્યં ગુહ્યાર્થવિત્સદા ।
ઊરુ પાતુ ગજારૂઢો વજ્રધારી ચ જાનુની ॥ ૫
જઙ્ઘે પાશાઙ્કુશધરઃ પાદૌ પાતુ મહામતિઃ ।
સર્વાઙ્ગં પાતુ મે નિત્યં મહામાયાવિશારદઃ ॥ ૬
ઇતીદં કવચં પુણ્યં સર્વાઘૌઘનિકૃન્તનમ્ ।
મહાવ્યાધિપ્રશમનં મહાપાતક નાશનમ્ ॥ ૭
જ્ઞાનવૈરાગ્યદં દિવ્યમણિમાદિવિભૂષિતમ્ ।
આયુરારોગ્યજનનં મહાવશ્યકરં પરમ્ ॥ ૮
યં યં કામયતે કામં તં તમાપ્નોત્યસંશયઃ ।
ત્રિસન્ધ્યં યઃ પઠેદ્વિદ્વાન્ સ યાતિ પરમાં ગતિમ્ ॥

ઇતિ શ્રીગુહ્યરત્ન ચિન્તામણૌ શ્રીમહાશાસ્ત્રનુગ્રહકવચં સમાપ્તમ્ ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

*shrI mahAshAstranugraha kavachastotraM*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*